अपि च ।
"सकृद्भूमौ निपतितो न शक्तः प्रणमेन्मुहुः ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
नतिविशेषस्तु यामले ।
"त्रिकोणाकारा सर्व्वत्र नतिः शक्तेः समीरिता ।
दक्षिणादायवीं गत्वा दिशं तस्माच्च शाम्भवीम् ॥
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत् ॥"* ॥
एकहस्तप्रणामनिषेधो यथा,—
"एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
इति तन्त्रसारः ॥ * ॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः ।
यथा, कालिकापुराणे ७० अध्याये ।
"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं संस्पृष्ट्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ॥
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ॥
यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥*
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
मननं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"* ॥
शूद्रपूजितदेवताप्रणामनिषेधो यथा,—
"यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि ।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि ॥"
इति कर्म्मलोचनम् ॥

प्रणाय्यः, त्रि, (प्रणीयते इति । प्र + णी + ण्यत् । "प्रणाय्योऽसम्मतौ ।" ३ । १ । १२८ । इति साधुः ।) असम्मतः । (यथा, भट्टिः । ६।६६ ।
" न प्रणाय्यो जनः कश्चित् निकाय्यं तेऽधितिष्ठति ॥")
अभिलाषविवर्ज्जितः । इति मेदिनी । ये, ६३ ॥ साधुः । इति त्रिकाण्डशेषः ॥ प्रियः । इति मुग्धबोधव्याकरणम् ॥

प्रणालः, पुं, (प्रणल्यते जलादिनिःसार्य्यतेऽनेनेति । प्र + णल + घञ् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥

प्रणाली, स्त्री, (प्रणाल + गौरादित्वात् ङीष् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥ (यथा, रामायणे । २ । ६२ । १० ।
"तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौशल्या अस्त्रजद्वाष्पं प्रणालीव नवोदकम् ॥")

प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति । प्र + नि + धा + ल्युट् ।) प्रयत्नः । (यथा, महाभारते । ५ । १०३ । २१ ।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे ।
मनःप्रविष्टो देवर्षे ! गुणकेश्याः पतिर्व्वरः ॥")
समाधिः । (यथा, रघुः । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ॥")
पवेशनम् । इति मेदिनी । ने, १६३ ॥ (यथा, सुश्रुते शारीरस्थाने ८ अध्याये ।
"बहुशः क्षता हीनशस्त्रप्रणिधानेनापविद्धा ॥")

प्रणिधिः पुं, (प्रणिधीयते इति । प्र + नि + धा + किः ।) चरः । (यथा, देवीभागवते । ५।३।६ ।
"प्रणिधिं प्रेषयामास हयारिस्तु शचीपतिम् ॥")
प्रार्थनम् । इत्यमरः । ३ ।३ । ६६ ॥ अवधानम् । इति भरतः ॥ (बृहद्रथपुत्त्रः । यथा, महाभारते । ३ । २१६ । ६ ।
"बृहद्रथस्य प्रणिधिः काश्यपस्य बृहत्तरः ।
भानुरङ्गिरसो धीर ! पुत्त्रो वर्च्चस्य सौरभः ॥")

प्रणिपातः, पुं, (प्र + नि + पत + घञ् ।) प्रणतिः । इति हेमचन्द्रः ॥ (यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")

प्रणिहितं, त्रि, (प्र + नि + धा + क्तः ।) स्थापितम् । प्राप्तम् । समाहितम् । इति मेदिनी । ते, २०३ ॥ (मिलितम् । यथा, रामायणे । ४ । २५ । ३४ ।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः ।
चुक्रुशुर्व्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् ॥")

प्रणीतं, त्रि, (प्र + णी + क्त ।) उपसम्पन्नम् । पाकेन रूपरसादिसम्पन्नशष्कुलीनादि । इत्यमरभरतौ । क्षिप्तम् । विहितम् । प्रवेशितम् । इति मेदिनी । ते, १२४ ॥ कृतम् । इति हेमचन्द्रः ॥

प्रणीतः, पुं, (प्रणीयते इति । प्र + णी + क्त ।) संस्कृतानलः । यज्ञे मन्त्रादिना संस्कृताग्निः । इत्यमरः । २ । ७ । २० ॥

प्रणीता, स्त्री, (प्रणीत + टाप् ।) यज्ञपात्रविशेषः । इति मेदिनी । ते, १२४ ॥

प्रणुतं, त्रि, (प्र + णु + क्त ।) स्तुतम् । इत्यमरः । ३ । १ । १०६ ॥

प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः । प्र + णी + "अचो यत् ।" ३ । १ । ९७ । इति यत् ।) वश्यः । इत्यमरः । ३ । ३ । २५ ॥ (यथा, महाभारते । १२ । ५६ । ६० ।
"असत्प्रणेयो राजेति लोकाश्चैव वदन्त्युत ॥")

प्रततिः, स्त्री, (प्रतनोतीति । प्र + तन + क्तिच् ।) विस्तृतिः । वल्ली । इति मेदिनी । ते, १२६ ॥

प्रतती, स्त्री, (प्रतति + ङीष् ।) व्रतती । इत्यमरटीकायां भरतः ॥

प्रतनः, त्रि, (प्र + "नश्च पुराणे प्रात् ।" ५ । ४ । २५ । इत्यस्य वार्त्ति॰ इति चकारात् त्नु तुट् च ।) पुरातनः । इत्यमरः । ३ । १ । ७७ ॥

प्रतर्कणं, क्ली, (प्र + तर्क + भावे ल्युट् ।) वितर्कः । तत्पर्य्यायः । तर्कः २ वितर्कः ३ व्यूहः ४ वहः ५ ऊहः ६ वितर्कणम् ७ अध्याहारः ८ अध्याहरणम् ९ ऊहनम् १० । इति शब्दरत्नावली ॥

प्रतलं, क्ली, (प्रकृष्टं तलम् ।) पातालभेदः । इति मेदिनी । ले, १०६ ॥

प्रतलः, पुं, (प्रकृष्टं तलमस्य ।) विस्तृताङ्गुलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥

प्रतानः, पुं, विस्तृतः । प्रपूर्व्वतनधातोर्घञ्प्रत्ययनिष्पन्नः ॥ (तन्तुः । यथा, रघुः । २ । ८ ।
"लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ॥")
वायुरोगविशेषः । तस्य संज्ञान्तरं अपतानकम् । यथा,—
"दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति ।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ।
वायुना दारुणं प्राहुरेके तदपतानकम् ॥"
इति माधवकरः ॥

प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्त्यस्या इति । प्रतान + इनिः ।) प्रतानवती । विस्तृतलतादिः । इत्यमरभरतौ ॥

प्रतापः, पुं, (प्र + तप् + घञ् ।) कोषदण्डजतेजः । कोषो धनं दण्डो दमः तद्वेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते सः । इति भरतः ॥ तत्पर्य्यायः । प्रभावः २ । इत्यमरः । २ । ८ । २० ॥ (यथा, मनुः । ९ । ३१० ।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु ॥"
पौरुषम् । यथा, रामायणे । १ । १ । ११ ।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ॥"
"प्रतापः स्मृतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । 'प्रतापौ पौरुषातपौ ।' इति कोषः ।" इति तट्टीकायां रामानुजः ॥) तापः । (यथा, रघुः । ४ । १२ ।
"यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
तेजः । इति मेदिनी । पे, २० ॥ अर्कवृक्षः । इति राजनिर्घण्टः ॥ (युवराजस्य छत्रे, क्ली । यथा, भोजराजकृतयुक्तिकल्पतरौ ।
"नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु कानकः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥")

प्रतापनं, क्ली, (प्र + तप + णिच् + भावे ल्युट् ।) पीडनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । २६ ।
"कानकं राजतं ताम्रं रैतिकं त्रपु सीसकम् ।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात् ॥")